# From Our Library. Lesson 40 C. Devayani.

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives. |
|---|---|---|---|
| कपट deceit N<br>उदर stomach N | मृ म्रिय् 6 A.P. die. | अन्तिकम् into the presence of | |
| वध murder M<br>उपाय method M | अव + गम् 1.P.P. to know/understand. | परं but | |
| संप्रदाय tradition M | स्पृह् 10 U.P. to like | | |
| पराभव disappearance / dissolution M | दह् 1 P.P. to burn.<br>रुच् 1 A.P. to like. | | |

## देवयानी

देवयानी दैत्यानां गुरोः शुक्राचार्यस्य पुत्री । सा शुक्राचार्यस्य एकाकिनी सुता । अतः सा पितुः प्रिया । देवानां गुरुः बृहस्पतिः । बृहस्पतेः पुत्रः कचः । देवदानवानां युद्धं भवति । बहवः देवाः रणे म्रियन्ते ।दैत्याः अपि म्रियन्ते । किन्तु सञ्जीवन्याः प्रभावेण दैत्याः पुनः जीवन्ति । अतः देवाः सञ्जीवनीम् इच्छन्ति ।कचः शुक्राचार्यस्य अन्तिकं गच्छति । सः शुक्राचार्यं विद्यादानाय याचते । शुक्राचार्यः कपटम् अवगच्छति ।सः कचाय सञ्जीवनीं न यच्छति ।परं दैत्याः कचात् भीताः । ते कचस्य वधोपायं ( वध + उपाय ) चिन्तयन्ति ।ते कचस्य वधं कुर्वन्ति ।देवयानी कचे स्निह्यति तस्मै स्पृहयति च ।शुक्रः कचाय जीवदानं यच्छति । क्रुद्धाः देत्याः पुनः कचस्य वधं कुर्वन्ति तं दहन्ति च । शुक्राय वारुणी रोचते ,अतः दैत्याः वारुण्या मिश्रितां कुर्वन्ति । तां वारुणीं शुक्रः पिबति । देवयानी कचम् आह्वयति। शुक्राचार्यः ध्यायति । सः कचं स्वोदरे पश्यति ।सः सञ्जीवनीं जपति ।कचः तस्य उदरात् बहिः आगच्छति । शुक्रः म्रियते । कचः सञ्जीवनीं जपति ।शुक्रः च पुनः जीवति, परन्तु देवाः सञ्जीवनीं लभन्ते ।वारुण्या शुक्रस्य नाशः भवति । अतःतस्य संप्रदायः अपि पराभवं गच्छति ।

Note: स्पृह् and रुच् both are used with the चतुर्थी विभक्ति ....but in different ways. Whoever/whatever one स्पृह् s, falls into the चतुर्थी विभक्ति and the one who does the liking falls into the प्रथमा विभक्ति |

When using रुच् , the one who does the liking falls into the चतुर्थी विभक्ति and that which is liked falls into the प्रथमा विभक्ति |